## घनिलचौ च। (७९/२०३४)

अनुकम्पायाम् [1]इत्यादि सर्वमनुवर्तते । [2]पूर्वेण ठचि विकल्पेन प्राप्ते वचनम् । बह्वचो मनुष्यनाम्नो[3] घन् इलच् इत्येतौ प्रत्ययौ भवतः । चकाराद् यथाप्राप्तं [4]च । देवियः, देविलः, देविकः, देवदत्तकः । यज्ञियः, यज्ञिलः, यज्ञिकः, यज्ञदत्तकः ॥

## प्राचामुपादेरडज्वुचौ च। (८०/२०३६)

पूर्ववत् सर्वमनुवर्तते । उपशब्द आदिर्यस्य तस्मादुपादेः प्रातिपदिकाद् बह्वचो मनुष्यनाम्नः अडच्वुच्-[5]प्रत्ययौ भवतः[6] । चकाराद् घनिलचौ[7] प्रत्ययौ भवतः ठच् च वा । उपडः, उपकः, उपियः, [8]उपिलः, उपिकः, उपेन्द्रदत्तकः । [9]प्राचांग्रहणं पूजार्थम् । वा [10]इत्येव हि वर्तते ॥

## जातिनाम्नः कन्। (८१/२०३७)

बह्वचः इति नानुवर्तते । सामान्येन विधानम् । जातिशब्दो यो मनुष्यनामधेयो व्याघ्र सिंह इत्येव[11]मादिः, तस्माद् अनुकम्पायां नीतौ च[12] कन्प्रत्ययो भवति । व्याघ्रकः । सिंहकः । शरभकः[13] । वावचनानुवृत्ते-र्यथादर्शनमन्योऽपि [14]भवति । [15]व्याघ्रिलः । सिंहिलः । नामग्रहणं स्वरूपनिवृत्त्यर्थम् ॥

## अजिनान्तस्योत्तरपदलोपश्च। (८२/२०३०)

कन् इत्यनुवर्तते, मनुष्यनाम्नः इति च । अजिनशब्दान्तात् प्रातिपदिकान् मनुष्यनाम्नोऽनुकम्पायां कन्-प्रत्ययो भवति, तस्य चोत्तरपदलोपः । [16]व्याघ्राजिनो नाम कश्चिन्मनुष्यः, सोऽनुकम्पितः व्याघ्रकः । सिंहकः[17] ॥

## ठाजादावूर्ध्वं द्वितीयादचः। (८३/२०३८)

लोपः इत्यनुवर्तते । अस्मिन् प्रकरणे यः ठः अजादिश्च प्रत्ययः, तस्मिन् परतः प्रकृतेर्द्वितीयादच ऊर्ध्वं यच्छब्दरूपं तस्य लोपो भवति । ऊर्ध्वग्रहणं सर्वलोपार्थम् । अनुकम्पितो देवदत्तः देविकः, देवियः, देविलः । यज्ञिकः, यज्ञियः, यज्ञिलः । उपडः, उपक, उपियः, उपिलः, उपिकः । ठग्रहणमुको द्वितीयत्वे कविधानार्थम् । अजादि-लक्षणे [18]हि माथितिकादिवत् प्रसङ्गः । वायुदत्तः वायुकः । [19]पितृदत्तः पितृकः ।

[६१३] चतुर्थादच [20]ऊर्ध्वस्य लोपो वक्तव्यः । (म. भा. २. ४२५)

अनुकम्पितो बृहस्पतिदत्तः बृहस्पतिकः बृहस्पतियः बृहस्पतिलः (म. भा. २. ४२५) ।

---

1. नीतौ च तदुक्तात् बह्वचः सर्वनाम्नः इति क. ड. ह. 2. पूर्ववच्च क. 3. प्रातिपदिकात् इत्यधिकम् क. 4. च नास्ति फ ह. 5. इत्येतौ इत्यधिकम् ह. 6. प्राचां मतेन इत्यधिकम् क. ह. 7. च इत्यधिकम् ब. ड. 8. उफिलः ग. 9. प्राग्ग्रहणं ग. 10. इत्यनुवर्तते क. ह. 11. आदिः नास्ति फ. 12. गम्यमानायां इत्यधिकम् क. फ. 13. वराहकः इत्यधिकम् ड. ह. 14. प्रत्ययः इत्यधिकम् फ. 15. व्याघ्रियः, सिंहियः ह. 16. व्याघ्राजिन नामा क. 17. कृष्णकः इत्यधिकम् ब. क. ड. इ. फ. ह, उष्ट्रकः इत्यधिकम् ग. 18. हि नास्ति क. 19. पितृदत्तकः क. 20. ऊर्ध्वस्य नास्ति ह.